Total Pages—7 **PG/IIIS/SAN/301(A, B & C)/23**
**(New)**

# M.A. 3rd Semester Examination, 2023

## SANSKRIT

PAPER – SAN-301(A, B & C)

*Full Marks* : 50

*Time* : 2 hours

*The figures in the right hand margin indicate marks*

*Candidates are required to give their answers in their own words as far as practicable*

## GROUP – A

( *Literature* )

(सर्वे प्रश्नाः संस्कृतभाषया देवनागरीलिप्या च समाधेयाः)

1. यथानिर्देशमुत्तरं दीयताम् – 10×2

(क) ध्वनितत्त्वनिरुपणे ध्वनिप्रस्थानवादिनां मतानि सम्यक् आलोच्यन्ताम् ।

*अथवा*

आलङ्कारिकेषु आचार्यकुन्तकस्यावदानम् आलोच्यताम् ।

(*ख*) छन्दःशास्त्रस्येतिहासे पिङ्गलाचार्यस्य अवदानं प्रस्तूयताम् ।

*अथवा*

आधुनिकसंस्कृतसाहित्ये श्रीजीवन्याय-तीर्थस्य किमवदानम् ? तत् संक्षेपेण प्रतिपाद्यताम् ।

**2.** यथानिर्देशमुत्तरं दीयताम् - 5×2

(क) कयोश्चिद् <u>द्वयोः</u> टीका लेख्या-

(*i*) भरताचार्यः

(*ii*) वामनाचार्यः

(*iii*) विश्वनाथः ।

(*ख*) कयोश्चिद् <u>द्वयोः</u> टीका लेख्या- 5×2

(*i*) मिवारप्रतापम्

(*ii*) चिपिटकचर्वणम्

(*iii*) गङ्गादासः ।

**[ Internal Assessment – 10 Marks ]**

## GROUP – B

( *Pāṇinian Grammar* )

(सर्वे प्रश्नाः संस्कृतेनैव समाधेयाः)

क–विभाग

**1.** एकः प्रश्नः समाधेय : 10

(*क*) 'ऐन्द्र व्याकरण'–सम्बन्धे एकः नातिदीर्घः प्रबन्धः निरुप्यताम् ।

(*ख*) सरस्वतीकण्ठाभरणविषये एकः प्रबन्धः निरुपणीयः ।

**2.** द्वयोर्व्याख्या कार्या – 5×2

(*क*) आपिशलिः

(*ख*) गार्ग्यः

(ग) जैनेन्द्रः ।

खं–विभाग

**3.** एकः प्रश्नः समाधेयः – 10

(क) 'अथ शब्दानुशासनम्' इति भाष्योक्तेः माधवाचार्यदिशा–व्याख्या कार्या ।

(ख) नैयायिक–मीमांसकमतखण्डनपुरः सरं स्फोटस्वरुपं विव्रियताम् ।

**4.** द्वयोर्व्याख्या कार्या – 5×2

(क) अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम् ।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः ।।

(ख) आसन्नं ब्रह्मणस्तस्य तपसामुत्तमं तपः ।
प्रथमं छन्दसामङ्गमाहुर्व्याकरणं बुधाः ।।

(ग) अध्रुवेन निमित्तेन देवदत्तगृहं यथा ।
गृहीतं गृहशब्देन शुद्धमेवाभिधीयते ।।

**[ Internal Assessment – 10 Marks ]**

## GROUP – C

(सर्वे प्रश्नाः संस्कृतेनैव समाधेयाः)

क–विभाग

1. एकः प्रश्नः समाधेयः - 10

(क) अनुमानस्वरूपविषये भारतीयपाश्चात्यदर्शनयोर्मतिः सयुक्ति आलोच्यताम् ।

(ख) को नाम हेत्वाभासः ? सः कतिविधः ? तेषु अनैकान्तिकहेत्वाभासस्य स्वरूपं निरुप्यताम् ।

2. यथानिर्देशं समाधेयम् -

(क) सकारणं हेन्वाभासः निर्णीयताम् द्वयोः - $2\frac{1}{2}\times2$

(i) गगनारविन्दं सुरभि अरविन्दवात् ।

(ii) शब्दोऽनित्यः कृतकत्वान् ।

(iii) अग्निरनुष्णः कार्यत्वात् ।

(*ख*) अधस्तनानां वाक्यानाम् आवर्तनं विवर्तनं वा क्रियताम् (पञ्चानाम्) $1 \times 5$

(*i*) दरिद्रदेशमात्रम् अनुन्नतः

(*ii*) गङ्गा भारतस्य मुख्या नदी

(*iii*) सर्वे मनुष्याः मरणशीलाः

(*iv*) एकमपि उत्तरं न समीचीनम्

(*v*) केचन कवयः अध्यापकाः

(*vi*) धार्मिकः पुरुषः कदाचित् सुखी भवति ।

(*vii*) सर्वम् उज्ज्वलं वस्तु स्वर्णं न भवति ।

## ख–विभाग

**3.** एकः प्रश्नः समाधेयः – 10

(*क*) बौद्धदर्शनमते क्षनिकत्ववादो निरूपणीयः ।

(*ख*) न्यायमते लौकिकसन्निकर्षस्वरुपम् सविभागं सोदाहरणम् आलोच्यताम् ।

**4.** द्वयोः टीका लेख्या – 5 × 2

(क) वैशेषिकमते अभावः

(ख) जैनमते द्रव्यम्

(ग) शाङ्करमते माया ।

**[ Internal Assessment – 10 Marks ]**